Gujarat University Library, Ahmedabad

Gujarat University Library, Ahmedabad

१ ॥श्रीगणेशायनमः॥ ॥अस्यश्रीसिद्धलक्ष्मिस्तोत्रमंत्रस्यहिर
ण्यगर्भऋषिः श्रीमहालक्ष्मीमहासरस्वतीदेवता अनुष्टुप्छंदः
ॐबीजं ह्रींशक्तिः श्रींकिलकं ममसमस्तक्लेशपीडादारिद्र्यनि
रसनार्थं ऐश्वर्यश्रीप्राप्त्यर्थंममनोप्सितसिध्यर्थं श्रीसिद्ध
लक्ष्मीस्तोत्रमंत्रजपेविनियोगः ॐश्रींसिद्धलक्ष्मीअंगुष्ठाभ्यान
मः ॐह्रींविष्णुतेजतर्जनी० ॐक्लींमातानंदमध्यमाभ्यांनमः ॐदै
त्यमालिनीअनामिका० ॐतेजप्रकाशिनीकनिष्टिका० ॐश्रींब्रा
ह्मीचवैष्णवीचकरतलकरपृष्टा० मूलेनअष्टदिशाबंधनंकुर्या
त् ॐसिद्धलक्ष्मीहृदयाय० ॐह्रींविष्णुतेजसीरशेस्वाहा ॐक्लीं
मातानंदशिखायेवषट् ॐदैत्यमालिनीकवचायहुं ॐतेजप्र

Gujarat University Library, Ahmedabad

कात्रिनीनेत्रत्रयायवौषट् ॐ श्रीं ब्राह्मीचवैष्णवीश्रस्त्रायफट् ॥ अ
थध्यानं ब्राह्मीचवैष्णवीनंद्रो षड्भुजांचचतुर्मुखां त्रिनेत्रांखड्गत्रि
शूलांपद्मचक्रगदाधरां १ पीतांबरधरांदेवीनानालंकारशोभि
तां तेजःपुंजधरांश्रेष्ठांध्यायद्बालकुमारिकां २ इतिध्यानं ॥ अ
थमंत्रः ॐ ह्रीं क्लीं श्रीं ऐं ब्राह्मीचवैष्णवीरौद्रीकालिकारक्षणं
नवी ॐकारलक्ष्मीरूपेणजकारविष्णुमव्ययं ३ मकारपुरुषं
नामदेवीप्रणवमुच्यते सूर्यकोटीप्रतीकाशं चंद्रकोटिसमप्र
भं ४ तन्मध्येनकरं स्तुत्यं ब्रह्मरूपीव्यवस्थितां ॐकारपरमा
नंदं क्रीयतेसुखसुंदरी ५ सिद्धलक्ष्मीमोक्षलक्ष्मीआदिलक्ष्मी
नमोस्तुते सर्वमंगलं प्रथमंत्र्यंबिकेगौरी द्वितीयवैष्णवीतथा

२ ६ त्रतीयंकमलाप्रोक्ताचतुर्थंसुंदरीजय पंचमंविस्नुपत्नीच
षष्टिकात्यायनीतथा ७ सप्तमंतुवराहरूपां अष्टमंहरिवल्ल
भा नवमंषडनीश्रूलादशमंदेविदेविका ८ एकादशंचसिद्ध
लक्ष्मीद्वादशांहंसवालुका · एतत्स्तोत्रमिमं[illegible]यःपठेत्सततं
नरा · ९ सर्वपापविमुक्तस्तेनात्रकार्यविचारणा एकमासद्वि
मासंवात्रिमासंचचतुर्थकं १० पंचमासंषण्मासंत्रिकालं
यःसदापठेत् ब्रह्मानोकेशितादुःखीदारिद्र्यपीडिता ११
जन्मांतरसहस्रेषुमुच्यतेसर्वकिल्विषैः अलक्ष्मीलभतेलक्ष्मी
अपुत्रोपुत्रवान्भवेत् १२ धन्योयशस्वीशत्रुघ्नोवह्निचौरभ
यंतुच शाकिनीभूतवैतालसर्वव्याधनिपातिते १३ राजद्वारे २

Gujarat University Library, Ahmedabad

३ समास्यानेकारायहनिबंधनात् इश्वरेण कृतं स्तोत्रं प्राणि
नां हितकारकं १४ सस्तुवंती ब्राह्मणो नित्यं दारिद्रं न च बाध्य
ते सर्वपापहरं लक्ष्मी सर्वसिद्धिप्रदायनी १५ इति श्रीब्र
ह्मांडपुराणे सिंधुमथने इश्वरविस्नुसंवादे सिद्धलक्ष्मीस्तो
त्रं संपूर्णम् श्रीकल्याणमस्तु शुभं भवतु श्री

Gujarat University Library, Ahmedabad